03.10.20
3

पलभा-चरखण्डानयनयोः प्रकारः —

मेषादिगे सायनभागसूर्ये दिनार्द्धजाभापलभा भवेत्सा।
त्रिष्ठाहता स्युर्दशभिर्भुजङ्गैर्दिग्भिश्चरार्द्धानि गुणोद्धृतान्त्या॥

अन्वयः — सायनभागसूर्ये, मेषादिगे राश्यंशादिभिः शून्ये, सति या दिनार्द्धजा भा सा पलभा भवेत्। त्रिष्ठा दशभिः भुजङ्गैः दिग्भिः हता अन्त्या गुणोद्धृता चरार्द्धानि स्युः।

तत्र — सायनभागसूर्ये अयनांशसहितसूर्ये, मेषादिगे, राश्यंशादिभिः शून्ये, सति, दिनार्द्धजा मध्याह्नकालिकी, भाः पलभाः अक्षच्छाया, भवेत, सा त्रिष्ठा स्थानत्रयस्थिता, क्रमेण दशभिः १०, भुजङ्गैः अष्टभिः ८, दिग्भिः १० हता गुणिता, तदनन्तरम् अन्त्या तृतीयस्थानस्थिता, गुणोद्धृता त्रिभिर्भक्ता कर्तव्या, तदा चरार्द्धानि चरखण्डानि, स्युः।

व्याख्या — जिस दिन अयनांश सहित सूर्य राशि, अंश, कला, विकला से शून्य हो उस दिन दोपहर के समय सम भूमि पर १२ अंगुल का शंकु रखें, उसकी छाया का जो अंगुल प्रमाण हो, उसको पलभा कहते हैं। उस पलभा संख्या को तीन जगह लिखकर क्रम से उसको १०।८।१० से गुणा करें। अन्तिम ३ रे गुणनफल में ३ का भाग दें। इससे क्रमशः ३ चरखण्ड होंगे।

डॉ० सुधिवर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना पूर्णियाँ

03.10.20
2

तद्भुजभागाश्चेत् खवेभघ्नाः तस्य केन्द्रस्य भुजांशेन नवमांशेन हीनाः तेनैव निघ्नाः गुणिताः च नख्याः विंशतिः, विधेयाः, ते पृथक् स्थाप्याः। तद् गोंडशोननगेषुभिः तभ्यांशन्यूनसप्तपञ्चाशत ते पृथक् स्थाप्याः। परिहृताः भक्ताः, अंशादिकं फलं स्यात्। विषयमिममवलम्ब्य सूर्यसिद्धान्ते कृतो विशेषविचारः प्रसङ्ग-नुरोधादिह प्रस्तूयते —

'ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद् विशोध्य च।
शेषं केन्द्रं पदं तस्माद् भुजज्या कोटिरेव च'॥

अन्यदपि —

'अजादिकेन्द्रे सर्वेषां शैघ्रे मान्दे च कर्मणि।
धनं ग्रहाणां लिप्तादौ तुलादावृणमेव च'॥

व्याख्या — केन्द्र अथवा ग्रह आदि तीन राशि से कम हों, तो उसे भुज कहते हैं। यदि तीन राशि से अधिक हों, तो उसको ६ राशि में से घटाकर उसको भुज बना लिया जाता है। नौ राशि से अधिक हों, तो १२ राशि में से घटाकर शेष संख्या भुज कही जाती है। तदनन्तर ३ राशि में भुज को घटाकर जो शेष बचे, उसको कोटि कहते हैं। ३-३ राशि का १-१ पद होता है। २ राशि १८ अंश ० कला ० विकला यह सूर्य का मन्दोच्च होता है।

मन्दोच्च में अभीष्ट ग्रह घटा देने पर जो शेष रहता है, वह मन्दकेन्द्र कहा जाता है। शीघ्रोच्च में अभीष्ट ग्रह घटा देने पर जो शेष रहता है, उसको शीघ्रकेन्द्र कहते हैं। मेष आदि ६ः केन्द्र में धन मन्दफल होता है। तुला आदि ६ः केन्द्र में ऋण मन्दफल होता है।

शास्त्री-III

03.10.20

1

रविचन्द्रस्पष्टाधिकारः :—

दोस्त्रिभोनं त्रिभोर्ध्वं विशेष्यं रसैश्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम्।
कोटिरेकैककं त्रित्रिभैः स्यात्पदं सूर्यमन्दोच्चमष्टाद्रयोंऽशा भवेत्॥

मन्दोच्चं ग्रहवर्जितं निगदितं केन्द्रं तदाख्यं बुधैः
केन्द्रे स्यात्स्वमृणं फलं क्रियतुलाद्येऽथो विधेयं रवेः।
केन्द्रं तद्भुजभागखेचरलवोनघ्ना नखास्ते पृथक्
तद्दोरंशोननगेषुभिः परिहृतास्तेऽंशादिकं स्यात् फलम्॥

अन्वयः – त्रिभोनं (केन्द्रम्) दोः (भवति), त्रिभोर्ध्वं रसैः विशेष्यं (तदा दोः सञ्जायते), अङ्काधिकं चक्रतः (विशोध्यं स्यात् तदा दोः) स्यात्। भुजोनं त्रिभं कोटिः, त्रित्रिभैः एकैकं पदं स्यात्। अष्टाद्रयः अंशाः सूर्यमन्दोच्चं भवेत्। ग्रहवर्जितं मन्दोच्चं, बुधैः तदाख्यं केन्द्रं निगदितम्। क्रियतुलाद्ये केन्द्रे स्वम् ऋणं फलं स्यात्। अथ रवेः केन्द्रं विधेयम्। तद् भुजभागखेचरलवोनघ्नाः नखाः (करणीयाः) ते पृथक् (स्थाप्याः), तद् दोरंशोननगेषुभिः परिहृताः ते अंशादिकं फलं स्यात्।

तात्पर्य – त्रिभोनं राशित्रयान्न्यूनं, केन्द्रं, दोः भुजः, स्यात्। भुजबाहू प्रवेष्टो दोः। इत्यमरः। त्रिभोर्ध्वं त्रिराशेरधिकं, रसैः षड्भिः, विशेष्यं न्यूनतां प्रापणीयम्, तदा दोः स्यात्। अङ्काधिकं नवराशितोऽधिकं, चेत् तर्हि चक्रतः द्वादशराशितः, विशोध्यं, तदा दोः स्यात्। भुजोनं त्रिभं राशित्रयं, कोटिः स्यात्। त्रित्रिभैः त्रिभिस्त्रिभीराशिभिः, क्रमेणैकैकं पदं स्यात्। यथा– राशित्रयं यावत् प्रथमं, तदनु राशिषट्कं यावद् द्वितीयं, तत्पश्चाद् राशिनवकं यावत् तृतीयं, तदनन्तरं राशिद्वादशकं यावच्चतुर्थं पदं भवतीत्याशयः। अष्टाद्रयः अष्टसप्ततिः अंशा, सूर्यमन्दोच्चं भवेत्।

ग्रहवर्जितं ग्रहेण हीनं, मन्दोच्चं, बुधैः दैवज्ञैः, तदाऽऽख्यं, केन्द्रं निगदितं कथितम्। क्रियतुलाद्ये केन्द्रे मेषादिषट्के किंवा षड्राश्यल्पे फलं स्वं धनं भवति। तुलादिषट्के किंवा षड्राश्यधिके केन्द्रे फलम् ऋणं भवतीत्याशयः। अथ रवेः सूर्यस्य केन्द्रं विधेयं कर्तव्यम्।

P.T.O